पूर्वास्येऽनिलखातनं यममुखे खातं शिवे कारयेत्
शीर्षे पश्चिमगे च वह्निखननं सौम्ये खनेन्नैरृते
दक्षिणकोणे पूर्वविभागे पूजनपूर्वं शिला समर्प्या ।
स्थाप्या शेषशिला दक्षिणतः स्तम्भाः समर्प्या विधानेन ॥"*॥
ब्रह्मशम्भुयंया ।
"सूत्रं भित्तिशिलान्यासं स्तम्भस्यारोपणं तथा ।
पूर्वदक्षिणोर्मध्ये कुर्य्यादित्याह काश्यपः ॥"
नारदः ।
"नभस्यादिषु मासेषु त्रिषु त्रिषु यथाक्रमम् ।
पूर्वादिदिक्शिरोवामपार्श्वशायां प्रदक्षिणम् ॥"
वास्तुशास्त्रेऽपुराणम् ।
"वास्तोः शिरसि पुच्छे च वामकुक्षौ च पृष्ठतः।
आयुष्कामः खनेन्नैव दक्षकुक्षौ खनिः शुभा ॥

> भित्तेर्मूलं स्थापनीयं जलान्ते
> पाषाणे वा हेमरत्नैः सगर्भम् ।
> शीर्षं गुर्व्वी लेपहीनाधिका वा
> सन्धिश्लेषिः पादहीनार्थहान्यैः ॥

भवनपुरसुराणां सूत्रणे पूर्वमुक्तः
कथित इह पृथिव्याः शोधनेऽपि द्वितीयः ।
तदनु सुखनिवेशे स्तम्भसंरोपणे स्या-
द्भवनवसनकाले पञ्चधा वास्तुयज्ञः ॥*॥
हृचा दुग्धसकण्टाश्च फलिनस्त्याज्या गृहाद् दूरतः
शस्ते चम्पकपाटले च कदली जाती तथा केतकी ।
यामादूर्द्ध्वमशेषवृक्षसुरजा च्छाया न शस्ता गृहे
पार्श्वे कस्य हरेरवीशपुरतो जैनानुचण्डशः क्वचित् ॥

> स दुग्धवृक्षा द्रविणस्य नाशं
> कुर्व्वन्ति ते कण्टकिनोऽरिभीतिम् ।
> प्रजाविनाशं फलिनः समीपे
> गृहस्य वर्ज्याः कलधौतपुष्पाः ॥

दुष्टो भूतसमाश्रितोऽपि विटपी नोच्छिद्यते शङ्कितः
तद्विल्वोश्च शमीमशोकवकुलौ पुन्नागसच्चम्पकौ ।
द्राक्षापुष्पकमण्डपञ्च तिलकान् क्षणां वपेद्दाड़िमीं
सौम्यादेः शुभदौ कपीतनवटावौदुम्बराश्वत्थकौ ॥

> उत्सङ्गनामाभिमुखः प्रवेशः
> स्यात् पृष्ठभङ्गो भवनस्य पृष्ठात् ।
> विनाशहेतुः कथितोऽपसव्यः
> सृष्ट्या प्रशस्तो भवनेऽखिलेऽसौ ॥

प्रावेशः प्रतिकायको वरुणदिग्वक्त्रो भवेत् सृष्टितो
वामावर्त्त उदाहृतो यममुखेऽसौ हीनबाहुर्बुधैः ।
उत्सङ्गो नरवाहनाभिवदनः सृष्ट्या यथा निर्म्मितः
प्राग्वक्त्रोऽपि च पूर्णबाहुरुदितो गेहे चतुर्द्धा पुरे ॥*॥
हस्तः पर्वाष्टयुक्तो मुनिवररचितः पर्व चैकं त्रिमात्रं
मात्रा षण्णां यवानामुदरमिलिता निस्त्वचामुत्तमानाम् ।
पुष्पैश्चत्वारि पूर्वं तदनु च विभजेदङ्गुलैः पर्वपुष्पै-
र्निंशन्यौ रक्तकाष्ठौ मधुमय उदितः खादिरो वंशधात्वोः ॥
ज्येष्ठोऽष्टाभिर्यवोदरैस्तु मुनिभिर्म्मध्यस्तु षट् कन्यसो
माप्यं चोत्तमकेन ग्रामनगरं क्रोशादिकं योजनम् ।
प्रासादप्रतिमे नृपस्य भवनं मध्येन हर्म्यादिकं
यानं षड्यवसम्भवेन शयनं छत्रासनास्त्रादिकम् ॥*॥

> रुद्रो वायुर्विश्वकर्म्मा हुताशो
> ब्रह्मा कालस्तोयपः सोमविष्णुः ।
> पुष्पे देवा मूलतोऽस्मिंश्च मध्यात्
> पश्चाष्टान्त्यं द्वाग्निवेदैर्विभज्यम् ॥

ईशो मारुतविश्ववह्निविधयः सूर्य्यश्च रुद्रो यमो
वैरूपो वसवोऽष्ट दन्तिवरुणौ षड्वक्त्र इच्छा क्रिया ।
त्वान्दं वित्तपतिर्निशाकरजयौ श्रीवासुदेवो हली
कामो विष्णुरितिक्रमेण मरुतो हस्ते त्रयोविंशतिः ॥*॥

> उच्चाटनं रोगभयञ्च दुःखं
> वह्नेर्भयं पीड़नकं प्रजायाः ।
> मृत्युर्विनाशोऽपि धनक्षयः स्यान्-
> मोहः क्रमाद्दैवतपीड़नेन ॥*॥
> हस्तो यत्नात् पुष्पयोरन्तराले
> त्वष्टा धार्य्यो मन्दिरादौ निवेशे ।
> हस्ताद्भूमौ यात्यकस्मात्तदासौ
> कार्य्ये विघ्नं दुःखमाविष्करोति ॥

तालौ द्वादशमात्रिकापरिमितस्तालद्वयं स्यात् करः
पादोनद्विकरोऽपि किष्कुरुदितश्चापश्चतुर्भिः करैः ।
क्रोशो दण्डसहस्रयुग्ममुदितो द्वाभ्याञ्च गव्यूतिका
ताभ्यां योजनमेव भूमिरखिला कोटीशतं योजनैः ॥

> सूत्राष्टकं दृष्टिनृहस्तमौञ्जं
> कार्पासजं स्यादवलम्बसंज्ञम् ।
> काष्ठञ्च सृष्टाख्यमतोऽपि लेख्य-
> मित्यष्ट सूत्राणि वदन्ति सन्तः ॥

इति वास्तुशास्त्रे राजवल्लभमण्डने मिश्रका लक्षणवर्णनं नाम १ अध्यायः ॥ * ॥
"संग्रामेऽन्धकरुद्रयोस्तु पतितः स्वेदो महेशात् क्षितौ
तस्माद्भूतमभूच्च भीतिजननं द्यावापृथिव्यांमहत् ।
तद्दैवै रभसा विगृह्य निहितं भूमावधोवक्त्रकं
देवानां रसनाच्च वास्तुपुरुषस्तेनैव पूज्यो बुधैः ॥
प्रासादे भवने तड़ागखनने कूपे च वापीवने
जीर्णोद्धारपुरे च यागभवने प्रारम्भनिर्वर्त्तने ।
वास्तोः पूजनकं सुखाय कथितं पूजां विना हानये
पादौ रक्षसि कं शिवेऽङ्घ्रिकरयोः सन्धौ च कोणद्वये ॥

> चैत्राकृतिर्वास्तुरिहार्च्चनीय-
> स्त्वेकांशतोभागसहस्रयुक्तः ।
> साधारणोऽष्टाष्टपदोऽपि तेषु
> चैकाधिकाशीतिपदस्तथैव ॥*॥

ग्रामे भूपतिमन्दिरे च नगरे पूज्यश्चतुःषष्टिकै-
रेकाशीतिपदैः समस्तभवने जीर्णे नवाब्धंशकैः ।
प्रासादेऽथ शतांशकेस्तु सकले पूज्यस्तथा मण्डपे
कूपे षण्णवचन्द्रभागसहिते १९६ वापीतड़ागे वने ॥
ईशो मूर्द्ध्नि समाश्रितः श्रवणयोः पर्ज्जन्यनामादितिरापस्तस्य गले तदंशयुगले प्रोक्तो जयश्चादितिः ।
उक्तावर्य्यमभूधरौ स्तनयुगे स्यादापवत्सो हृदि
पञ्चेन्द्रादिसुराश्च दक्षिणभुजे वामे च नागादयः ॥
सावित्रः सविता च दक्षिणकरे वामे द्वयं रुद्रतो
मृत्युर्मैत्रगणस्तथोरुविषये स्यान्नाभिपृष्ठे विधिः
मेढ्रे शक्रजयौ च जानुयुगले तौ वह्निरोगौ स्मृतौ
पूष्णो नन्दिगणाश्च सप्त विबुधाः कल्पशाः पदोः पैतृकः ॥*॥

> ईशस्तु पर्ज्जन्यजयेन्द्रसूर्य्याः
> शत्यो भृशाकाशक एव पूर्व्वे ।
> वह्निश्च पूषा वितथाभिधानो
> गृहक्षतः प्रेतपतिः क्रमेण ॥
> गन्धर्वभृङ्गौ मृगपितृसंज्ञौ
> द्वारस्थसुग्रीवकपुष्पदन्ताः ।
> जलाधिनाथोऽप्यसुरश्च शेषः
> स पापयक्ष्मापि च रोगनागौ ॥
> मुख्यश्च भल्लाटकुवेरशैला-
> स्तथैव बाह्ये दितितोऽदितिश्च ।
> द्वात्रिंशदेवं क्रमतोऽर्च्चनीया-
> स्त्रयोदशैव त्रिदशाश्च मध्ये ॥
> प्रागर्य्यमा दक्षिणतो विवस्वान्
> मैत्रोऽपरे सौम्यदिशाविभागे ।
> पृथ्वीधरोऽसावथ मध्यतोऽपि
> ब्रह्मार्च्चनीयः सकलेषु मध्ये ॥
> आपापवत्सौ शिवकोणमध्ये
> सावित्रकोऽग्नौ सविता तथैव ।
> कोणे महेन्द्रेन्द्रजयौ तृतीये
> रुद्रोऽनिलेऽन्योऽपि च रुद्रदासः ॥